Reg. No. : ....................................

Name : .......................................

**SY 19**

**MARCH 2019**

Time : 2½ Hours
Cool-off time : 15 Minutes

Part – III

## SANSKRIT SASTHRA

Maximum : 80 Scores

***General Instructions to Candidates :***

- There is a 'Cool-off time' of 15 minutes in addition to the writing time.
- Use the 'Cool-off time' to get familiar with questions and to plan your answers.
- Read questions carefully before answering.
- Read the instructions carefully.
- Calculations, figures and graphs should be shown in the answer sheet itself.
- Give equations wherever necessary.
- Electronic devices except non-programmable calculators are not allowed in the Examination Hall.

**निर्देशा** :

1. **सर्वे** प्रश्नाः समाधेयाः ।
2. प्रश्नान् प्रश्ननिर्देशान् च सावधानं पठित्वा उत्तरं लिखत ।
3. प्रश्नानां वाचनाय **15** निमेषाः अधिकतया कल्पिताः ।

## क – विभागः

### व्याकरणम्

**कोष्ठकात् समुचितमुत्तरं चित्वा लिखत ।**

1. अतो भिस् _________ । **(1)**

   (ओस्, अस्, ऐस्)

2. अधः प्रदत्तयोः प्रश्नयोः एकस्य उत्तरं लिखत । **(6)**

   (क) राम शब्दस्य षष्ठी द्विवचनरूपनिष्पादनलेखने स्खालित्यमस्ति चेत् शोधयत ।

   राम = अर्थवदधातुरप्रत्ययःप्रातिपदिकम् ।

   राम ओस् – ससजुषो रुः ।

   राम राम ओस् – एचोऽयवायावः ।

   राम ओस् – ओसि च ।

   रामे ओस् – सरूपाणामेकशेष एकविभक्तौ ।

   रामयोस् – द्वेकयोर्द्विवचनैकवचने ।

   रामयोर् – स्वौजसमौट् .......... ।

   रामयोः – खरवसानयोर्विसर्जनीयः ।

   (ख) (सु) (टा) (अम्) (ङे) (ङसि) (ङस्)

   वलयेषु दत्तान् स्वादिप्रत्ययान् उपयुज्य पेटिकायाः दत्त रामशब्दविभक्तिरूपाणि समीचीनप्रकारेण घटयत ।

   | रामात्, रामः, रामाय, रामेण, रामं, रामस्य |
   |---|

3. को नाम समासः ? सूचनानुसारं समासभेदान् सलक्षणं लिखत । **(6)**

   **सूचना :**

   पूर्वपदार्थप्रधानः।, उत्तरपदार्थप्रधानः ।,

   उभयपदार्थप्रधानः ।, अन्यपदार्थप्रधानः ।,

   विशेषसंज्ञाविनिर्मुक्तः ।

4. कोष्ठकात् समुचितमुत्तरं निर्धार्य लिखत ।

"अव्ययीभावश्च" इति सूत्रेण किं विधीयते ? **(1)**

[अव्ययीभावसमासः, नपुंसकत्वम्, अव्ययत्वम्]

5. पेटिकायां प्रदत्तेभ्यः समस्तपदेभ्यः अव्ययीभावसमस्तपदानि चित्वा लिखत । **(4)**

| |
|---|
| हरिहरौ, उपकृष्णम्, ऊढरथः, दुर्यवनम्, भूतपूर्वः, निर्मक्षिकम्, कृष्णश्रितः, सुमद्रम् |

6. अधिगोपशब्दस्य तृतीयाविभक्त्येकवचने "अधिगोपम् – अधिगोपेन" इति रूपद्वयं कथं लभ्यते इति विशदयत । **(3)**

7. पूरयत –

__________ गतिकारकपूर्वस्यापि ग्रहणम् । **(1)**

**अथः प्रदत्तयोः प्रश्नयोः एकस्य उत्तरं लिखत ।** **(4)**

8. (क) सूचनानुसारं "तृतीया तत्कृतार्थेन गुणवचनेन" इति सूत्रं सोदाहरणं व्याख्यात –

**सूचना** – तृतीया तत्पुरुषः ।

(ख) सूचनानुसारं "सप्तमी शौण्डैः" इति सूत्रं सोदाहरणं व्याख्यात ।

**सूचना** – सप्तमीतत्पुरुषसमासः ।

9. प्राप्तमुदकं यं सः प्राप्तोदकः इति लौकिकविग्रहः । **(4)**

प्राप्त सु उदक सु इति अलौकिक विग्रहः ।

अधः प्रदत्तानां सूत्राणां साहाय्येन प्राप्तोदकः इत्यस्य समासप्रक्रियां लिखत ।

**सूत्राणि** – अनेकमन्यपदार्थे, सुपो धातुप्रातिपदिकयोः, आद्गुणः, ससजुषो रुः, खरवसानयोर्विसर्जनीयः ।

10. समस्तपदानि लिखत । **(4)**

(क) पीतम् अम्बरं यस्य सः ________ ।

(ख) ऊढः रथः येन सः ________ ।

(ग) चित्राः गावः यस्य सः ________ ।

(घ) जलजे इव अक्षिणी यस्याः सा ________ ।

11. पूरयत – **(1)**

मात्रा सह उक्तौ ________ वा शिष्यते ।

12. यथोचितं योजयत । **(5)**

| **(क)** | | **(ख)** |
|---|---|---|
| राजदन्तादिषु परम् | – | हरिहरौ । |
| धर्मादिष्वनियमः | – | शिवकेशवौ । |
| अजाद्यदन्तम् | – | अर्थधर्मौ । |
| अल्पाच्तरम् | – | ईशकृष्णौ । |
| द्वन्द्वे घि | – | राजदन्तः । |

## ख विभागः

समुचितमुत्तरं निर्धार्य लिखत ।

13. कारणसत्वे कार्याभावः _______ । **(1)**

(अन्वयव्यभिचारः, व्यतिरेकव्यभिचारः, अन्वयव्याप्तिः)

14. पीलुपाकवादिनः के ? **(1)**

(नैय्यायिकाः, वैशेषिकाः, मीमांसकाः)

15. कः गणे न अन्तर्भवति ? **(1)**

(सांख्यम्, वैशेषिकम्, चार्वाकम्)

16. ______ महावाक्येषु न अन्तर्भवति । **(1)**

(प्रज्ञानं ब्रह्म, तत्त्वमसि, ब्रह्मसत्यं जगन्मिथ्या)

रिक्तस्थानानि पूरयत –

17. ________ राशयः सन्ति । **(1)**

18. आत्मविद्यासंघस्य स्थापकः _______ । **(1)**

एकेन वाक्येन उत्तरयत ।

19. अनुबन्धचतुष्टयं लिखत । **(2)**

20. सुवर्णतैजसत्वे–पूर्व पक्षं लिखत । **(2)**

21. “वाग्भटानन्दः” इति नाम कथं लब्धम् । **(2)**

22. “निर्वृतिपञ्चकस्य” उत्पत्तिकारणं लिखत । **(2)**

23. यथोचितं योजयत – **(3)**

| (क) | | (ख) |
|---|---|---|
| वाग्भटानन्द गुरुः | – | काराट् गोविन्दन् मेनोन् । |
| ब्रह्मानन्द शिवयोगी | – | अय्यप्पः । |
| चट्टम्पिस्वामी | – | वयलेरिकुञ्ञिकण्णन् । |

टिप्पणीं लिखत – (24-25)

24. ईश्वरसद्भावे प्रमाणम् । **(4)**

25. तमसः दशमद्रव्यत्वनिराकरणम् । **(4)**

26. एकस्य टिप्पणीं रचयत । **(4)**

(क) वारक्रमः

**अथवा**

(ख) ज्योतिश्शास्त्रे केरलराज्यस्य योगदानम् ।

खण्डिकाम् आरचयत – **(5)**

27. सामाजिकोद्धारणे वाग्भटानन्दः किं किमकरोत् ?

28. एकमधिकृत्य उपन्यासं लिखत । **(6)**

मङ्गलस्य समाप्तिसाधनत्वं पूर्वपक्षं निराकृत्य विशदयत ।

**सूचना** : मङ्गलसत्वे कार्याभावः – मङ्गलाभावे कार्योत्पत्तिः – विघ्नबाहुल्यम् ।

**अथवा**

तर्कशास्त्रस्य प्राधान्यम् ।

**सूचना** : सर्वशास्त्रोपकारकता – न्यायवैशेषिकयोः सम्मेलनम् – तर्कसंग्रहः – पदार्थानां संग्रहः ।